# Śhraddhā Sūktam

[KYV – TB 2-8-8-6]

ॐ श्र॒द्धया॒ऽग्निः समि॑ध्यते । श्र॒द्धया॑ विन्दते ह॒विः । श्र॒द्धां भग॑स्य मू॒र्धनि॑ ।

ॐ śhrad’dhayā (a)g’nis’ samidh’yatē |
śhrad’dhayā vin’datē haviḥi |
śhrad’dhām’ bhagas’ya mūr’dhani |

वच॒साऽऽवे॑दयामसि । प्रि॒यꣳ श्र॑द्धे॒ दद॑तः । प्रि॒यꣳ श्र॑द्धे॒ दिदा॑सतः ।

vachasā (ā)vēdayāmasi |
priyag’geśh’ śhrad’dhē dadataḥa |
priyag’geśh’ śhrad’dhē didāsataḥa |

प्रि॒यं भो॒जेषु॒ यज्व॑सु । इ॒दं म॑ , उदि॒तं कृ॑धि । यथा॑ दे॒वा , असु॑रेषु ।

priyam’ bhōjēṣhu yaj’vasu |
idam’ ma , uditaṅ’ kṛdhi | yathā dēvā , asurēṣhu |

श्र॒द्धामु॒ग्रेषु॑ चक्रि॒रे । ए॒वं भो॒जेषु॒ यज्व॑सु । अ॒स्माक॑मुदि॒तं कृ॑धि ।

śhrad’dhāmug’rēṣhu chak’rirē |
ēvam’ bhōjēṣhu yaj’vasu | as’mākamuditaṅ’ kṛdhi |

श्र॒द्धां दे॒वा यज॑माना॒ः । वा॒युगो॑पा॒ , उपा॑सते । श्र॒द्धाꣳ हृ॑द॒य्य॑याऽऽकू॑त्या ।

śhrad’dhān’ dēvā yajamānā-ḥa | vāyugōpā , upāsatē |
śhrad’dhāgm’ hṛday’yayā (ā)kūut’yā |

श्र॒द्धया॑ हूयते ह॒विः । श्र॒द्धां प्रा॒तर्ह॑वामहे । श्र॒द्धां म॒ध्यंदि॑नं॒ परि॑ ।

śhrad’dhayā hūyatē haviḥi |
śhrad’dhām’ prātar’havāmahē |
śhrad’dhām’ madh’yan’dinam’ pari |

www.sai-vedanet

श्र॒द्धाꣳ सू॒र्य॑स्य नि॒म्रुचि॑ । श्रद्धे॒ श्र॒द्धा॑पये॒ह मा॑ । श्र॒द्धा दे॒वान॒धि॑वस्ते ।
śhrad’dhāgm’ sūr’yas’ya nim’ruchi |
śhrad’dhēśh’ śhrad’dhāpayēha māā |
śhrad’dhā dēvānadhivas’tē |

श्र॒द्धा विश्व॑मि॒दं जग॑त् । श्र॒द्धां काम॑स्य मा॒तर॑म् । ह॒विषा॑ वर्धयामसि ।
śhrad’dhā viśh’vamidañ’ jagate |
śhrad’dhāṅ’ kāmas’ya mātaram’m |
havishā var’dhayāmasi |

ॐ शान्तिः॒ शान्तिः॒ शान्ति॑ः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ||

www Sai Veda net